# शीक्षासमुच्चयम्

आद्या षोडश स्वराश्च कथिताः
शेषाः खलु व्यञ्जनं
षट्चत्वार इहोष्मसंज्ञकयमाः
पञ्चोत्तरा विंशति स्पर्शा हि
रङ्गविसर्गभक्तिरबलोऽनुस्वार एकैकशः
अन्तस्थाश्च चतस्र इत्यृषिगणैः षष्टिर्हि वै याजुषि
स्वरास्तु ब्राह्मणा ज्ञेया वर्गाणां प्रथमाश्च ये ६
द्वितीयाश्च तृतीयाश्च चतुर्थाः क्षत्रियाः स्मृताः
वर्गाणामुत्तमा वैश्या अन्तस्थाश्च तथैव च ७
अनुस्वारो विसर्गश्च शूद्रा ऊष्माण एव च
कथं वर्णास्तु वर्णानां ब्राह्मणः क्षत्रियादयः ८
स्वकालात् पाद एव स्याद् ब्राह्मणानां तु कथ्यते
तदर्धं क्षत्रियादीनां शास्त्रदृष्ट्यानुवर्तते ९
कैश्चित्पादस्तु सर्वेषां व्यञ्जनानाञ्च कथ्यते १०
करेणुः कर्वणी चैव हरिणी हारितेति च ११
हंसपादेति विज्ञेयाः पञ्चैता स्वरभक्तयः

करेणू रहयोर्योगे कर्वणी लहकारयोः १२
हरिणी रशसानां च हारिता लशकारयोः
या तु हंसपदा नाम सा तु रेफषकारयोः १३
एवं पञ्चविधां भक्तिमुच्चरेत्स्वर्गकामुकः
चित्स्वरा यत्र पूर्वा स्यादूष्मसंज्ञे परे स्थिते
पूर्वस्वरस्य संभाक् स्यात्स्वरभक्तिः प्रकीर्तिता १४
रेफस्य त्रुटिमात्रं स्यादृकारस्त्वर्धमात्रिकः
लकारः पादमात्रेण लृकारश्च पुनः पुनः १५
हरिणी त्वर्धमात्रा स्याद्धारिता द्विपदाधिकाः
करेणुश्चार्धमात्रा स्यादीषदूना च कर्विणी १६
हंसपादा त्रिपादा स्यात् स्वतन्त्रा मातृका स्मृता १७
शषसेषु स्वरोदयां हकारे व्यञ्जनोदयाम्
शषसेषु तु विवृतां हकारे संवृतां विदुः १८
ऋग्विरामः स्वरभक्तिः स्वप्रधाना प्रकीर्तिता
ऋतस्य धूर्षदं चेति स्वतन्त्रा भक्तिरुच्यते १९
स्वराद्ध्रस्वात्परं भक्तिं प्रचयत्वं नयेद्बुधः १९-२
स्वरमात्रा भवेदेका विरामे च विवृत्तिषु

स्वरभक्तिः स्वतन्त्रा वा व्यञ्जनस्यांगमन्यथा  २०
स्वराद्दीर्घात् पदान्तस्थात्स्वरभक्तिस्तु या भवेत्
सा तु पूर्वस्वरांगं स्याद्दोषावस्थोर्हविष्मती  २१
वायुभेदात्स्वरभेदाद्रूपभेदादनेकधा  २१-२
स्वरभक्तिं प्रयुञ्जानास्त्रीन्दोषान्परिवर्जयेत्
इकारश्चाप्युकारश्च ग्रस्तदोषं तथैव च  २२
कामो मन्युस्तथा पापं त्रिषु पूर्वेषु तत्परः
स्वरभक्तिं विजानीयादिकारो नात्र संभवेत् २३
उवर्णश्शषसैः सार्त्थं रेफौकारौ तु निष्ठता
इकारश्चात्र सद्भावात् भक्तिञ्चेच्छत्यसंशयम् २४
पुपूपौ त्रिषु पूर्वेषु शषहेषु परेषु च
रेफादुकार एवास्ति तस्माद्भक्तिर्न विद्यते २५
हकारस्य लकारस्य स्वरभक्तिर्न विद्यते
हकारे लस्य भक्तिस्तु तैत्तिरीये तु पठ्यते २६
इति स्वरभक्तिप्रकरणं समाप्तम्

## द्विरोष्ठ्यप्रकरणम्

ओष्ठ्ययोः स्वरयोर्मध्ये व्यञ्जनं यदि दृश्यते

पृथग्भावस्तु कर्तव्य एकं चेद्व्यञ्जनं न तत् २७
विवृतिर्वा विरामो वा स्वरभक्तिस्तथैव च
अनुस्वारोऽपि दृष्टश्चेत्पूर्वोक्तो नात्र संशयः २८
अनुस्वारे विवृत्तौ च विरामे चाक्षरद्वये
द्विरोष्ठ्यौ तु विगृह्णीयाद्यत्रौकारवकारयोः २९
बहवश्च तयोर्मध्ये दृश्यन्ते च पृथक्पृथक्
परोऽधरस्तु कर्तव्यो वकारे वाधरस्य च ३०
ओष्ठ्ये स्वरेषु कार्येषु प्रथमेनाक्षरद्वये
परयोरोष्ठयोश्चैव कार्यन्न स्यात्कदाचन ३१
ओष्ट्ययोः स्वरयोर्मध्ये दृश्यते च तपो यदि
पृथग्भावस्तयोर्न स्यात्त्रुटि मात्रं तयोर्भवेत् ३२
ओष्ठ्ययोः स्वरयोर्मध्ये पवर्गो यत्र दृश्यते
पृथग्भावस्तयोर्न स्यात् भिन्नरूपौ स्वरौ यदि ३३
इति द्विरोष्ठ्यप्रकरणम्

## प्रयत्नप्रकरणम्

आद्यन्तयोस्तु वर्गश्चेत्प्रयत्नस्तत्र इष्यते

अवसाने स विज्ञेयाः संहितायां न चेत्तथा ३४ तु चेत्तथा

सकारस्य विसर्गेण संयोगो यत्र दृश्यते हकारस्य?

प्रयत्नस्तत्र जानीयाद्यथा वर्गे तथा भवेत् ३५

ॐ मः पवर्गसंबन्धे प्रयत्नस्तत्र नेष्यते

मात्रा तत्र पकारश्च प्राप्यते नात्र संशयः ३६

केचिद्दन्त्यप्रयत्ने तु सर्वधा यत्नमेव तु

नान्यत्र कुरुते यत्नमोष्ठ्यकंठादयस्मृताः ३७ मोष्ट्य

वर्णादधस्मृताः

प्रयत्नश्च पृथग्भावं कैश्चित् सर्वत्र नेष्यते

सर्वधा यत्नमेव स्याद्वर्णमात्रस्वरादिषु ३८

पदकाले पदान्मांतात्पवर्गे परतस्थिते

पदेन क्रमकालेऽपि न तु पूर्वस्य वेष्टने ३९पदे

तत्क्रमकालेपि

इति प्रयत्नप्रकरणम्

## नकारप्रकरणम्

पादादौ च पदादौ च संयोगावग्रहेषु च
न शब्द इति विज्ञेयो योन्यस्सो न इति स्मृतः ४०
पदमद्ध्ये नकारो यः पदादि न भविष्यते
स ह्रस्वात्परो नकारस्तु पृक्तस्वरपरो यदि ४१
पदादिवत्प्रयोग स्यात्तथादीर्घात्परादपि
वैश्वशब्दो नकारस्तु पुनःशब्दे तथा परे ४२
जिह्वाग्रावे ततो स्यातां मनः शब्दे तथा परे
तवर्गे वक्ष्यमाणे तु पदादौ वर्तते यदि ४३
न चापि वेद इत्येव जिह्वाग्रं करणं स्मृतम्
द्वयोर्नकारयोर्मद्ध्ये प्राकृतौ भवतौ यदि ४४
नकारौ दन्तमूलस्थौ तथा तकारपरावपि
ह्रस्वात्परस्वरपरो नकारो यत्र दृश्यते ४५
द्विरुक्तस्तत्र नेच्छन्ति संयोगोपाधिकं विधिम्
दकारप्रकृतिर्यस्तु नकारन्तत्र नेष्यते ४६
अवग्रहे तु द्विविधो नकारस्थं प्रकीर्तितः
अन्त्यो दन्त इति विज्ञेयो इतरो दन्तमूलकः ४७

अवग्रहे नकाराणामनेकत्वेन नेष्यते
अवसाने तवर्गीयाद्यन्तौ दन्तमूलजौ ४८
अपवादौ नकारस्त्वसंयोगे यः स वर्जितः ४९
इति नकारप्रकरणम्
नकारान्तं पदं पूर्वमन्तस्थासूत्तरं यदि
नकारान्तस्थयोर्मध्ये तत्र वर्णमसंयुतम् ५०
रेफपूर्वो नकारो यः पदान्तो यत्र दृश्यते
विशेषस्तत्र जानीयाद् द्वित्वमित्यभिधीयते ५१
संयुक्तौ नवकारौ चेदृकारः परतो यदि
संयुक्तं तत्र विज्ञेयं नोभयोर्व्यक्तिरिष्यते ५२
अन्तस्थाद्युदये पूर्वः पंचमस्तु द्विरुच्यते
इतरादौ पदे तत्र स न चेति स्मृतौ बुद्धैः ५३
अग्नोपमानसाग्निश्च रेफो बहुविधश्चकः
यस्य पूर्वो भवेयुस्तु च न शब्दं निबोधत ५४
प्रकीर्णम्
नकारान्तं पदं पूर्वं हकाराद्रपरो यदि
असंयुतं न जानीयाद्द्वित्वमित्यभिधीयते ५५

नकारान्तं पदं पूर्वं  वकाराद्यपरो यदि
असंयुतं न जानीयाद्द्वित्वमित्यभिधीयते  ५६
इति नकारान्तप्रकरणम्
मात्राद्विमात्रानुस्वारो द्विमात्रान्मात्र एव तु
मात्रिकादपि संयोगे मात्रिकस्तु द्विरूपवत्  ५७
संयोगादिरियाद्द्वित्वमनुस्वारापरस्थितः
अनुस्वारो द्विरुच्येतासंयोगे परतस्थिते  ५८
अध्याये तैत्तिरीयाणामनुस्वारो यदा भवेत्
अर्धाद्यर्धौ गकारस्पदपरस्त्वनुनासिकः  ५९
अनुस्वारस्तयोर्मात्रः संहिता काल एव तु
पदमध्ये द्विमात्रं स्यादेकमात्रं द्विरूपवत्  ६०
व्यक्तिमध्यस्थनासिक्ये स्वकालात्पाद इष्यते
तत्काला हि तथाव्यक्तिः प्राप्यते नात्र संशयः  ६१
मकारान्तं पदं पूर्वं  ज्ञाति पूर्व्युत्तरे यदि
ज्ञेयो मकारो नस्सौर तत्र धर्मविवर्जितः  ६२
मकारोऽनुस्वारस्तिष्ठेत्तत्रानुस्वार एव हि
अनुस्वारस्त्वहश्शब्दे शिंशुमारे तथैव च  ६३

केचित्पठन्ति तत्रैनं न पठन्ति कदाचन  ६४

इत्यनुस्वारप्रकरणम्

ह्रस्वात्परानुनासिक्यं द्विमात्रं यत्तदुच्यते

दीर्घात्प्लुताच्च तन्नादमेकमात्रमिति श्रुतिः     इति स्मृतिः

वर्गोत्तमानां वर्गानां नादसंज्ञा प्रकीर्त्तिताः

नादश्वासो न हकारश्च वर्णानां ते गुणा स्मृताः

अनुनासिक end of page 125

page 126

कालस्तु विशेषेण विधीयते

दीर्घात्प्लुताच्च मात्रं स्यादेकमात्रं द्विमात्रकम्

अवसाने विशेषो यमन्येषाञ्च न विधीयते

संहितायां तु तन्मात्रं पदकालेऽधिको भवेत्

इत्यनुनासिकप्रकरणम्

ऋग्विरामस्त्रिमात्रं स्यातदर्धर्चेऽपि तथा भवेत्

पदकाले द्विमात्र स्यादेकमात्रो विवृत्तिषु

पदमध्ये तदर्धं  स्याद्वाक्यकाले द्विमात्रकः

तन्मात्रः केचिदित्याहुर्दीर्घाधिक्यं तु वा भवेत्

पदार्ध्यर्घनस्थानेषु पदार्ध्यर्घनवर्जिताः

तेषां विरामः षट्पादं भजन्त नात्र संशयः

इंग्यैः पदैश्च संयोगे विरामो मात्रिका स्मृतः

अवग्रहाणा

End of page 126

page 128

मन्ते च विरामो मात्रिकस्मृतः

काण्डप्रश्नानुवाकानां समाप्तो काल इष्यते

दशाष्टपञ्चमात्रं तु मात्राणां त्र्यहं भवेत्

उदात्ता मद्ध्यमश्च स्यात् त्रिमात्रं प्रणवः स्मृतः

पराशरश्चतुर्मात्रमहाद्ध्यात्मार्थतत्ववित्

प्रणवो वदे एवस्याद्दीर्घमात्र इति स्मृतः

अन्तमात्रोपरे दीर्घं व्यञ्जनन्त्वर्धमात्रिकः

प्रणवे तु त्रिमात्रं स्यात्तन्मातस्तु प्लुतो भवेत्

द्विमात्रदीर्घमित्याहुस्तदर्धं ह्रस्वसंज्ञकम्

व्यञ्जनं त्वणुमात्रं स्यादेकमात्रा क्वचित् भवेत्

द्विमात्रं तस्य जानीयानेकदा चित्रमात्रकम्

अतः परे विशेषोऽस्ति पादमात्रं तु तद्भवेत्
पूर्वकाले द्विमात्रं स्यादर्धमात्रं तदुच्यते
End 128

page 127
बहुशो यस्य पूर्वं स्यादणुमात्रन्तमुच्यते
अपरे तु द्विमात्रं स्यात् स्वराधिक्यो न संशयः
अस्वरं व्यञ्जनं नित्यमणुमात्रं प्रयुज्यते
संसर्गाणां तु बाहुल्यान्मात्रवृद्धिः प्रकीर्तिता
अन्तेऽर्धमात्रं तेषां स्याल्लकारस्य त्रिपादकः
अवसाने लकारस्यात्रिपादत्वं विधीयते
वाक्यप्रतीत्ययजुषामपदेथर्धमात्रता
वेदपाठे तु तत्कालो भाषायाञ्च न तत् भवेत्
गणिवृद्ध्यञ्जनं विंद्यात् सूत्रवञ्च स्वरं विदुः मणिमद्ध्यञ्जनं
दुर्बलस्य यथा राष्ट्रं हरते बलवानिति
दुर्बलं व्यञ्जनं तद्वद्धरते वलवान् स्वरः

चाषस्तु रवते मात्रं द्विमात्रं वा यसोऽब्रवीत्
त्रिमात्रं हि शिखी रौदी ह्येतन्मात्रादिलक्षणम्
End of page 127

130

अंगुलिस्फोटने यावत्तावत्कालस्तु मात्रिकः
निमेषकालो मात्रं स्यादिति नारद भाषितः
स्वस्थो नरे सुखासीने यावत्स्यन्दति लोचनम्
तावन्मात्रं विजानीयादक्षितत्कालपञ्चसु
निमेषकालो मात्रं स्यादिति नारद भाषितः?sequence?
ह्रस्वस्य रूपं  विज्ञेयं चतुर्भिरणुमात्रकम्
दीर्घं  चतुर्गुणं विंद्यात्त्रिगुणन्तत् प्लुतस्य तु
मनोऽवस्थमणुं विन्द्याद्व्रागवस्थं द्विराणवम्  ध्यपोद्धवम्
त्रिराणवन्तु जिह्वाग्रं निस्तुतो मात्रिकं स्मृतः  ?त्रिधानां तु
जिह्वाग्रान्निसृतो मातृको भवेत्?

चतुर्भिरणुभिर्मात्रं तदर्धं  तु तृटिर्भवेत्

न प्लुतप्रग्रहौ चेति सन्धिकार्यं  प्रयुञ्जते

मात्रमेकं तु तत्कालं मात्राधिक्यन्तथा परे

ह्रस्वपूर्वो वत्सानुसृतिः परवत्सानुसारिणी

?आदिह्रस्वावसानसृतिः परावत्सानुसारिणि?

पाकवत्युभयो ह्रस्वाद्दीर्घोभया पिपीलिका

मत्रि end of page 130

129

कावत्सानुसृतिः स्तथावत्सानुसारिणी  ।

पादोमापाकवत्युक्ता पादमात्रा पिपीलिका  ?पादो नास्याप्ताकयदि?

द्विरूपं वा त्रिरूपं वा प्राप्यते वाक्यमेव तु

तेषु तेष्ववकाशेषु मात्रो मात्रं च कथ्यते

इति मात्राकालप्रकरणम्

एकश्रुतिः क्वचिद्विद्यात् क्वचिच्च विहितस्वरः

एकश्रुतेरवसान उदात्तः स्वरितोऽपि वा

प्रकृतिर्वा संहितायां सर्वमेकश्रुतिर्भवेत्
तस्मात्पूर्वस्य वर्णस्य नीचत्वं कथ्यते बुधैः
क्वचिद्रूपमेव स्यात्क्वचिदादौ च मद्ध्यमे
अवसान उदात्तस्य सन्धौ नीचत्वमिष्यते
आरण्यादौ द्वयोश्च्यान्ते यथा वृत्तं तथैव च
अग्र एकश्रुतिर्हानि पश्चान्नास्ति परंपरा
परन्नास्ति श्रुतिश्चैव पदे तच्च यथा क्रमम्
अष्टौ वेदावसानानि (continues page 131?)

131

सूर्याग्न्योरनुवाकयोः ।
समाप्य कार्षतं तत्र उदात्तः परतः पदे
अष्टावेदावसानानि सूर्या अग्नय एव तु
समाप्य कार्षतं तत्र सूर्ये सत्येति पूर्वयुक्
स्वाहाकारस्वरो ज्ञेय उदात्तस्वरितोऽपि वा
निहतोदात्त एव स्यात् सूर्याग्निश्चानुवाकयोः

प्राणापानादि शुद्ध्यन्ताम् सर्वेषामनुदात्तकम्
ज्योतिः शब्दात्परं नास्ति श्रुतिरेका कथञ्चन
श्रोत्रपार्श्वे तथालक्ष्मी निहितं भिद्यमिष्यते
इत्येकश्रुतिप्रकरणम्
वर्णान्यत्वं स्वरान्यत्वं पञ्चप्रश्नेषु दृश्यते
आरण्यादौ द्वयोश्चान्ते त्रिषु चेवं विधीयते
नारायणे पितृमेधे स्वाद्ध्यायब्राह्मणेऽपि च
नपा भिनितिपूर्वस्तु दुस्पृष्टं भजते ध्रुवम्
तत्स शब्दविशिष्टं तु यद्द्वित्वं कथ्यते end of 131 continues 132

132

बुधैः ।
तत्कार्यमुत्सृजेत्तत्र स्वरितं भजते ध्रुवम्
सप्तस्वरानतिक्रम्य स्वरितो वर्तते क्वचित्
अल्पवायुस्तु तस्मिन्स्यात् पादवृत्त इति स्मृतः
प्राप्तस्वरानतिक्रम्य यथेष्टं वर्तते स्वरः
उपनिषद्विशेषेषु शिष्टानां मार्ग एव तु

इति वर्णान्यत्वप्रकरणम्

तवर्गे प्रथमागमः कालके च यमो विधिः

लोपाकारः पदो मध्ये स्वरात्पूर्वं प्रकंपितम्

चक्रं परश्च तन्त्र स्यात् परयोरन्तरागमः

चकारं तत्र जानीयात्काठके परिकीर्त्तितः

अद्भ्य आदेशयवयोरिकारोकारवागमौ

रात्कामन्त्य भत्र्यचित्र्यधिष्णयाः कालके परिकीर्तितः

वामः शब्दाच नासिक्यं पूर्वं न प्राप्यते स्मृतिम्

तेन शब्दात्परः प्राप्तः प्राप्तं न प्राप्यते पठे

ऊष्मणा पृक्तसंयोगे निषेधस्तत्र नेष्यते

आदेशा end of 132 continues in 133

133

त् भक्तिरेव स्यात्पूर्वां गत्वं विधीयते ।

ऋकारश्च लृकारश्च पृक्त इत्यभिधीयते

ये पकारपदे वृत्तर्त्रपृक्तः प्रकृतिस्तत्र नेष्यते

गुणं प्राप्तं विजानीयात् काठके परिकीर्त्तितः
एष शब्दात् परो नित्यो निषेधस्तत्र नेष्यते
प्राप्तं तत्र विजानीयात् मायाकारप्रवर्त्तते
कालके वर्त्त्यमाणे तु सर्वोर्म्मद्ध्ये विधीयते
लोपाकारस्तु कर्त्तव्यं सुपृष्टं वर्जमेव च
शकारस्य नकारेण संयोगः काठके स्मृतः
अन्यत्र तु ञकारेण तैत्तिरीयव्यवस्थितः
काठकानां तु सर्वेषामथ त्रीनिषदान्तथा
द्विधिष्वं षणञ्चैषान् नान्यत्रेति विनिश्चयः
कालके रम्रवादेव ताश्च दीर्घानुनाकाः
कश्चित् परिधिलवे वनयाम्ये तत्परा इति ।

End page 133

134

तनूनन्त्वामिति त्वेतन्स्वानुनासिकतांगतम् ।
तैत्तिरीयकवेदे तत्सानुनासिकतंगतः
अचः पूर्वो ह्यनुस्वारान्क्वचित्वेदभाषितः
इत्येष संहिता दृष्टस्तनुश्शब्दात्परस्सरः

इति काठकप्रकरणम्

स्वरात्परस्य वर्णस्य क्वचिद्द्वित्वञ्च कथ्यते

ऋकारात्प्रथमस्यैव द्वित्वन्न स्यात्कथञ्चन

अधिकस्तस्य कालश्च प्राप्यते नात्र संशयः

पदान्तो यो नकारस्तु द्वित्वं सर्वत्र नेष्यते

अचः पूर्वा विकल्पोऽस्ति व्यञ्जनं नित्यमेव च

न रेफे वा हकारे वा द्विर्भावो जायते क्वचित्

न च वर्गद्वितीये तु न चतुर्थे कथञ्चन

तृतीये न चतुर्त्थस्या प्रथमेन परस्य च

आद्यं तं तस्य मद्ध्यञ्च स्वाक्षरेणैव पीडयेत्

कुत्रचित्स्वरयोर्मध्ये द्वित्वं लक्ष्यानुसारतः

पूर्वागमत्तथा तत्र ज्ञेयो वर्णविचक्षणैः

ह्रस्वस्य चाधिकारस्यासंधौ पूर्वागमस्तथा

# End of page 134

# 136

चकारं तत्र जानीयात्पदमद्ध्ये तु पठ्यते ?ककारं तत्र?

अनुनासिकपूर्वं तु ककारो मद्ध्यमागमः

दकारश्च तकारश्च थकारे च यथा क्रमम्  ?गकारश्च तकारे च यकारे च?

प्रथमस्य द्वितीयस्यात् सषकारपरो यदि  ?षशकारपरो?

अभ्यासोऽस्ति स विज्ञेयः पूर्वः प्रथम एव तु

दनकारे विशेषोऽस्ति थकारो यदि दृश्यते

अनभ्यासोऽस्ति विज्ञेयस्थकारो नात्र संशयः

इति द्विरुक्तिप्रकरणम्

अपूर्वो वा द्वितीयस्तु जिह्वाग्रं कथ्यते बुधैः

एष संबन्ध एव स्यादल्पप्राण इति स्मृतः

तवर्गात्तु द्वितीयस्या जिह्वाग्रं कथ्यते बुधैः

ककारस्तेन सम्बन्धादल्पप्राणा इति स्मृताः

आद्यन्तयोश्च वर्गाणां द्वितीयाच्छषसेषु च

तेषामल्पतरो End of page 136

135

वायुः कथ्यते नात्र संशयः ।

परस्परस्य संयोगे स्पर्शानां सम्भवेद्यदि

यत्पूर्वस्य श्रुतिर्नास्ति विरामाद्व्यञ्जनस्य च

स्पर्शानां तु सह स्पर्शैः संयोगो यो भवेन्मिथः

पूर्वस्य संश्रुतिर्वक्त्रैर्न तु तस्य मते स्मृतिः

पकारादेव नासिक्यः प्राप्यते मन्दवायुना ?हकारादेव?

नेष्यते श्रुतिरेवास्य सम्यक् धारणमेव तु

लकारस्य तकारस्य संयोगो यो भवेन् मिथः स्वरितो यदि

पूर्वस्य संश्रुतिर्वक्त्रैर्न तु तस्यै मते श्रुतिः

हकारादेव नासिक्यं प्राप्यते मंदवानुना

नेष्यते श्रुतिरेवात्र संयक् धारणमेव तु

लकारस्य वकारस्य संयोगे स्वरितो यदि

तदा संयुक्त एव स्यादसंयुक्तस्तदन्यथा

वर्गोत्तमै स्वराणां तु संयोगो यत्र दृश्यते

प्राप्यते तत्र तद्धर्मः स्वराः केचिद्वदन्ति ते

एकारस्य मकारेण संयोगो यत्र दृश्यते

अनुनासिकसंबन्धेस्त्वेकारस्य न विद्यते

न रेफो वा तकारो वापवार्गा त्रि दृश्यते

पूर्वयोर्गुणसंबन्धः कथ्यते नात्र संशयः

अमुपूर्वसकारश्च षत्वमाप्नोति सांहितात्
ज्योतिर्वायुविसर्ग End of page 135

137

श्च दुर्दुरुस्वात्म एव चरषत्वमिष्यते ।
महि शब्दादि यामेन देवेष्वग्निस्तथैव च
तमुष्टोतारशब्दश्च ऊर्वादुस्वप्न एव च
एतेषु वक्ष्यमाणेषु षत्वं प्राप्तं न विद्यते
संहिता ऊर्ध्वमेव स्यात् तत् ब्राह्मणादिषु पठ्यते
दिक्शब्दादभिनिहतो ब्राह्मणेषु च इष्यते
समधोषनिषेधे तु वै परित्यं वदेत्बुधः
आकारस्य त्वकारेण संयोगो वक्ष्यते क्वचित्
दीर्घं तत्र विजानीयाद् प्राप्नोति हि पठ्यते
इति प्रकीर्णकप्रकरणम् ?इत्यपूर्वप्रकरणम्?
अनुदात्तो हृदि ज्ञेयो मूर्द्ध्नुदात्त उदाहृतः

स्वरितः कर्णमूलीयः सर्वां गे प्रचयस्मृतः
तीव्रेण वायुना चैव स्वरितञ्चोच्चरे बुधः
वामकर्णस्य मू End of page 137

138

ले तु कीयादे नात्र संशयः ।
स्वरितोदात्तयोश्चैव स्वारप्रचययोस्तथा
प्रचयादनुदात्तश्च तेषां कार्यं तु कथ्यते
पूर्वं तीव्रतरो वायुस्तीव्रमेव परस्य तु
परस्य मन्दवायु स्यात्प्रयोक्तव्यं यथा क्रमम्
नित्यक्षैप्रोऽभिनिहतस्तैरोव्यञ्जन एव च
तिरो विरामः प्रश्लिष्टः पादवृत्तस्तु सप्तमः
अवग्रहात्परं यत्र स्वरितस्यादनन्तरम्
तिरोविरामं तं विन्द्यादुदात्तो यद्यवग्रहः
नित्यक्षैप्रो दृढतरो दृढोऽभिनिहतस्मृतः
तिरोविरामप्रश्लिष्टौ प्रोक्तौ मृदुतरा उभौ
चतुर्थः पादवृत्तश्च End of page 138

140

ताभ्यामल्पतरौ उभौ स्मृतः ।

दृढस्वरस्य विद्वद्भिः प्रयत्नाधिक्यमिष्यते

मृदुरल्पतरञ्चैव मद्ध्यमेन तु कारयेत्

इति स्वरविषयप्रकरणम्

द्विरुक्तं व्यञ्जनं य स्यात्पदं वासः क्रमं स्मृतः

शृंगवद्बालवत्स्य स्यात् बालिको कु च युग्मवत्

नेत्रवत्कृष्णसर्पस्य स विसर्ग इति स्मृतः

हकारं पञ्चमैर्युक्तः अन्तस्थाभिश्च संयुतम्

उरस्यं तं विजानीयात्कण्ठ्वमाहुरसंयुतम्

नवायं हमसंयोगे नासिकाभ्यां समुत्सृजेत्

न वदेत्तु रसात्यन्तं तथैव यरलवेषु च

औरस्यं पदकालोक्तौ संहितायां न चेत्तथा

संहितायाञ्च सत्भावे द्विभागो नास्ति चेत् बुधः

तत्र प्रयोगे वा अत्यन्तं निनयेद्बुधः

शीक्षा च प्रातिशाख्यञ्च विरुद्ध्ये तां मिथो

End of page 140

139

यदि ।

शीक्षातिदुर्बलेत्याहुः सिंहस्य च मृगी यथा

शीक्षा च प्रातिशाख्यञ्च विरुद्ध्ये ते यदा तदा

प्रातिशाख्याबलीय स्यादवकाशो न चेत् सदा

अंगुलोपविकारश्च विपरीता यदा तदा

शीक्षैव दुर्बलेत्यत्र विशेषश्च न संशयः

परस्परस्य संयोगः स्पर्शानां पंचमो यदि

तत्पूर्वस्य श्रुतिर्नास्ति समाश्य च तथैव च

प्रग्रहस्योपसर्गस्य समासस्य तथैव च

इति शब्दः प्रयोक्तव्यः समाप्तौ नेन संहिता

समासेऽवग्रहं कुर्यात्पदञ्चात्रानुसंहिता

यतोक्षरादिकरणम् पदान्तञ्च न तं विदुः

इति द्विरुक्तकप्रकरणम्        ?इति प्रकीर्णप्रकरणम्?

अनन्त्यञ्च भवेत्पूर्वमन्त्यञ्च परतो यदि

तत्र मद्ध्ये यमस्तिष्ठन् नासिकाञ्जानमुच्य

End of page 139

142

ते ।

स्पर्शानां पञ्चमैर्योगे भवन्ति हि यमाः स्मृताः

अयः पिण्डेन तत्तुल्यं घनबन्धाः प्रकीर्त्तिताः

परस्परस्य संयोगे स्पर्शानां पञ्चमैर्यदि

तत्पूर्वस्य श्रुतिर्नास्ति यमो मध्ये प्रकीर्त्तितः

वर्ग्यन्तं शषसैः सार्द्धमन्तस्थैश्चाप्यसंयुतम्

दृष्टायमान्निवर्त्तेत अत्यन्तं सूक्ष्ममाचरेत्

ऊष्मप्रकृतिका स्पर्शात्पञ्चमः परतो यदि

तत्र नैव यमोत्पत्तिरिष्यते नात्र संशयः

इति यमप्रकरणम्

क्रमोद्वाष्र्यामनुक्रम्या प्रसादायोत्तरं तयोः

उत्तरेणोपसंदध्याददधांतिं समापयेत्

यथा लक्षणमव्यग्रो यथान्यायं समुच्चरेत्

संहितावत्पदं पूर्वं तयोः पादवदुत्तरम्

आवृत्तिरवसानस्य प्रग्रहस्य च नेष्यते

आत्रेयेण तथाप्यत्र सा तयोस्तु विधीयते

अकारांतं पदं पूर्वमाङ्परं दृश्यते यदि

त्रिक्रमं तं विजानीयात् ओषुनः उषुणस्तथा

त्रिक्रमैवक्ष्यमाणे तु प्रथमं स्त्रिपदक्रमः

मद्ध्यंताभ्यां ततस्तेषु सविशेषमतः परम्

समस्तानि पदानि स्युर्यानि प्राप्तानि तत्र चेत्

विभज्योच्चारणं तेषां पूर्वं शिष्येण क्रमस्य तु

पुनः सुरवरकर्हौ रंतरावपिकश्चसः

अजरितिरेफाणस्युः सुहावसादपादवत्

एवं क्रमधियानः सर्वदोषविवर्जितः

श्रेयः परमवाप्नोति देवत्वमधिगच्छति

इति क्रम प्रकरणम्

य इच्छति जटां वक्तुं सजटं वक्तुमर्हति

इति जटा प्रकरणम्

नादस्तु श्रूयते घोषाद्विरामाद्वित्वमस्तथा

अनासिक्ये सनासिक्यो जाय End of 142

141

ते वर्णयोगतः ।

रंगवर्णात्प्रयुञ्जीयात न ग्रसेत्पूर्वमक्षरम्

दीर्घस्वरं प्रयुञ्जीयात् पश्चान्नासिक्यमाचरेत्

हृदयादुत्थितं रंगं कांस्य ध्वनि समस्मृतम्

द्विरामञ्च त्रिरामञ्च प्राप्यते सानुनासिकः

हृदयादुत्थितं रंगं कांस्य घोषत्समध्वनिः

मृदुश्चैव द्विमात्रञ्च दधन्वा इति दर्शनम्

हृदये मात्रिको मूर्ध्वान्यर्द्धमात्रस्ततः परम्

शेषो नासिक्य इत्येवं रंगवर्णस्समीरणम्

तथासौराष्ट्रिकानारि तक्रां इत्यभिभाषते

एवं रंगाः प्रयोक्तव्याः खे अराङ् इव खेदय

दीर्घस्तु प्लुतायमारंगाः तत्तथेति स्वयं विदुः

एकार्धमथ शेषाश्यः हृदये मूर्ध्नि नश्यति

स्वराः कंपाश्च रंगाश्च ये यत्कालाः End of 141

144

स्वभावतः ।

वर्धन्ते प्रोच्यमानास्ते क्षिप्रयन्तेऽपि वक्तरि

इति रंगप्रकरणम्

मध्ये तु कंपयेत्कम्पमुभे पार्श्वे समे स्मृते

संरंगं कम्पयेत्कम्पं रथीवेति निदर्शनम्

अदीर्घदीर्घवत्कुर्याद्विस्वरं यत्प्रयुज्यते

कंपा स्वरादिर्गमनि ह्रस्वकर्षणमेव तु

इति कम्पप्रकरणम्

तिस्त्रोवृत्तीरुपदिशन्ति वाचो विळंबितां मध्यमाञ्च दृताञ्च

व्रत्या नरैः कर्मविशेषमाहुमात्रा विशेषः परिवृत्तिमेति

अभ्यासार्त्थे द्रुतां वृत्तिं प्रयोगार्थे तु मध्यमाम्

शिष्याणामुपदेशार्त्थं कुर्याद्वृ End of page 144

143

र्त्तिं विळंबिताम् ।

अद्ध्यायने त्रिमात्रं स्यादध्ययने तद्द्विमात्रिकम्

सममाहुः प्रयोगे वा उच्यते मुनिभिस्त्रयः

विधिनोक्तन्नातिक्रमेन चाव्यक्तं समुच्चरेत्

अतिव्यक्तं न चाव्यक्तं विद्वद्भिस्त्रय उच्यते

वेदपाठं पुरस्कृत्या वेदसम्बन्धिनास्तथा

तेनत्पक्षत्युदात्तादीन् सर्वथा वेदबन्धनान्

त्रिभिस्त्रिभिश्चतुर्वाक्यमपर्यन्तं विनिर्दिशेत्

ए इत्येकन्पदं वाक्यं स्यादुत्तरस्यैकवाक्यता

आर्षे वच द्विभागे च प्रणवागे प्रयुज्यते

प्रातः काले तृतीये च विभागानन्तरा

end of 143

151

ā भवेत् ।

ब्राह्मणः प्रणवं कुर्यादादावन्ते च सर्वदा

सृवत्यानोंकृतं पूर्वम्परस्ताच्च विशीर्यते

अध्याये तैत्तिरीयाणामार्षे पाठ इष्यते

अनुवाकादनुवाकस्यावदेदादौ पदद्वयम्

प्रश्नात् प्रश्नञ्च न ब्रूयाद्धोत्रसंबन्धिनो न चेत्

अनार्षै वै च न ब्रूयादनुवाकन्तथैव चा

अद्धयने तैत्तिरियाणां दिवा कीर्त्तस्य सुभवे

तदग्रेन प्रयोक्तव्यं स्वाद्ध्याये त्वरितो भवेत्

तैत्तिरीयस्य वेदस्या पदवाक्यान्तसंश्रयः

गणितास्ते प्रयो

End of page 151

152

क्तव्यास्तेन गच्छन्ति ते मतिम्

यत्र देवासुरैश्चाथ कल्याणास्तु भवन्ति ते

तत्रोपांशु प्रयोक्तव्यो मन्त्र आत्मा जयात् भवेत्

संसृतायु समारंगं रात्रौ

---

कनिष्ठिका नामि  End of page 152

कुर्यान्न सर्वद

यदि कुर्यात्प्रमादात्तु प्रज्ञानश्यंत्यसंशयः

तस्मात्कुर्यात्समारंभं वर्जयेद्बुद्धिमाभरः

नैवं परेमुतंत्रेषुव्यभाकामं प्रवर्तयेत्

शिष्याणामुपदेशार्थमारंभे प्रथमे हनि

चतुरस्तनुवाकान्याभिन्वाप्यध्यापयेद्बुधः

शिष्याणामुपदेशार्थं  यथाकामं प्रयुज्यते

तद्देषं तत्र जानीयाद्दशक्तौन द्विरुच्यते

कनिष्टिका नासिका च मध्यमा चैव तर्जनि

153

कावमद्ध्यमा च प्रदेशिनि

नीचस्वरधृतोदात्तानं गुष्ठाग्रेण निर्दिशेत्

निर्दिशेद्दक्षिणे हस्ते मद्ध्यमे पर्विणि स्पृशेत्

से हकीत्तिमवाप्नोति प्रेत्य स्वर्गे महीयते

सव्म हस्तेन योऽधीते तस्य तन्निष्फलं भवेत्

हस्तात् श्रोष्टस्वरात् श्रोष्टो हस्तहीनन्तु यो धीते

स्वरवर्णविवर्जितं ऋग्यजुः सामभिर्दुग्धो वियोमधिगच्छति

हस्तेन वेदं यो धीते स्वरवर्णार्थसंयुतम्

ऋग्यजुः सामभिः पूतो ब्रह्मलोके महीयते

सव्यहस्तेन योऽधीते तस्य तन्निष्फलं भवेत्

हस्तात् श्रोष्टः स्वरात् श्रोष्टो न (-ए)

end of 153

154

वेदफलमश्नुते ।

हस्ताभ्रष्टस्वराद्भ्रष्टो वर्णात्कालात्प्रयत्नतः

प्रयोगाच्च परिभ्रष्टो न वेद फलमस्नुते

ऋषिमुच्चारयविप्रो हस्तकार्यं तु वर्जयेत्

सभवेत्तु शिरः कंपः पूर्ववाक्य भयादपि

तस्माद्धस्तेन निर्देशम् वर्जयेत् बुद्धिमान् द्विजः

मननसा हस्त शास्त्रोक्तम् स्मर उच्चारयेत्बुधः

इति प्रकीर्णकप्रकरणम्   इति स्वरोच्चारणप्रकरणम्

आत्मबुद्ध्या समद्ध्यस्था मनोवृङ्क्ते विवृक्षया

मनः कायाग्निमाहन्ति य प्रेरयति मारुतम्

मारुतस्तुरसि चरन् मन्द्रञ्जनयति स्वरम्

सो दीर्न्नो मूर्द्धन्यभिहतो च म्मुमा पद्यमारुतः

वर्न्न जनयते तेषामविभागः पञ्चधा स्मृतः

स्वरितः कालसस्थानात् प्रयत्नानुपदातः

इति वर्णविदुः प्राहुर्निपुणान्तन्निबोधत

यो यो  end of 154

146

यमन्तच्छरिरेग्निः स प्रेरयति मारुतम्

स शरीरं तदोपैति मनसा चैव युज्यते

ततः सञ्जायते नादस्तदिदम् ब्रह्मणो धरः

ईश्वरः सर्वभूतानां वाचस्पतिरसंशयम्

आकाशवायुप्रभवत् शरीरान् समुच्चरन्वक्तुमुपैति नादः

स्थानान्तरेषु प्रविभज्य मानो वर्णत्वमापद्यमियः स शब्दम्

तमक्षरं ब्रह्मपरं पवित्रं गुणाशयं सम्यगुशन्ति विप्राः

स श्रेयसा वाभ्युदयेन चैव सम्यक्प्रयुक्तं पुरुषं पुनाति

इति वर्णोत्पत्तिप्रकरणम्

गुरुत्वं लघुता साम्यं ह्रस्वदीर्घप्लुतानि च

लोपागमविकारांश्च प्रकृतिर्विक्रमः क्रमः

स्वरितोदात्तनीचत्वं श्वासो नादोंगमेव च

End of page 146

145

एतत्सर्वं  तु विज्ञेयं च्छन्दो भाषामधीयताम्

पदक्रमविशेषज्ञो वर्णक्रमविचक्षणः

स्वरमात्रा विभागज्ञो गच्छेदाचार्यसंसदम्

गच्छेदाचार्यसंसदम्  (End of chapter mark)

यद्द्वंजनांतं यदुचापिदीर्घं  स योगपूर्वं  च तथानुनासिकम्

एतानि सर्वाणि गुरूणि विन्द्यात् शेषान्यतोन्यानि ततो लघूनि

अर्व्यं जानां तयश्चृस्वमसंयोगपरं च यत्

अनुस्वारसंयुक्तमेतल्लघुनिबोधता

नाचव्यक्तं नचाव्यक्तमेवं वर्णानुदिं भवेत्

पयः  पूर्णामिवा मित्रं हरंक्षीरो यथा मतिः

क्रमविक्रमसंयन्नमद्रुतामविलंबिताम्

नीचो च्यस्वारसंपन्नां वदे कृतवतीं समाम्

माधुर्यमक्षरव्यक्तिः  पदच्छेदस्तथा त्वरा

धैर्घ्यं  लयसमर्त्थञ्च षडैते पाठका गुणाः

गीतिशीघ्री शिरः  कंपी यथा लिखितपाठकः

अनर्थो ज्ञोप्लुकंठश्चा षडते पाठकाधमाः

स्वस्थः प्रशान्तो निहतो वर्णानुच्चारयेत् बुधः
सुस्वरेणा सुवक्त्रेण प्रयुक्तं ब्रह्मराजते
व्याघ्री हरे यथात्पुत्रम् दंष्ट्राभ्यां न च पीडयन्
भीतापतनहेतुभ्यां तद्वद्वर्णात्प्रयोजयेत्
मार्जारः पुत्रमास्येन पीडयन् न च बाधकः
एवं वर्णप्रयोगेन ब्रह्मलोके महीयते
एवं वर्णप्रयोक्तव्यान End of page 145
148
नाव्यक्तौ न च पीडिताः
सम्य वर्णप्रयोगेन ब्रह्मलोके महीयते
प्रातः पठे नित्यमुरस्थितेन स्वरेण शार्दूलनतोपमेत
मद्ध्यन्दिने चैव यंकुञ्जितसन्निभेन
तारन्तु विद्यात्सवने तृतीये शिरोगतं तच्च सदाप्रयोजाम्
मयूरहंसान्यभूतस्वराणां तुल्येन नादेन शिरोगतेन
मंत्रो हीनः स्वरतो वर्णतो वा मिथ्याप्रयोक्तो न तमर्थमाह
स वाग्वज्रो यजमानं हिनस्ति यथेन्द्रशत्रुस्वरतो पराधात्
गीति शीघ्रशिरः कम्पी तथा लिखितपाठकः

अनर्थज्ञोऽल्पकरागठश्च षडैतेपाठकाधमः

उपांशु नष्टवैरितम् निरस्तं विलम्बितं

# End of page 148

# 147

तद्गदितं प्रगीतम्

निष्पीडितं ग्रस्तपदाक्षरञ्च व्रदेन्नदीनन्न तु सानुनस्यम्

कम्पितं भीतमुप्रष्टमव्यक्तमनुनासिकम्

काकस्वांशीर्षगतं तथा स्थानविवर्जितम्

विस्वरं विशिखं चैव विशिष्टं विषमाहुतम्

वाकुलं तालुभीरुं च पाठदोषाः श्चतुदर्शशा

न करालो नकंपोष्ठो नासर्वानुनासिकः

गद्गदो बद्धजिह्वश्च प्रयोगान्वक्तुमर्हति

नशगाः कंपयेद्गात्रं भ्रूवो वाप्यक्षिगाी तथा

तैलपात्रं यथात्मानं तथा धारयते बुधः

इति समुच्चारप्रकरगाम्

न वेदविदुषो विप्राः सर्वशास्त्रमधीयते

सर्वाभरगासंपत्तिर्नग्नस्त्रीयुवोद्ध्रुवः

अधीतमपि यो वेदं विमुञ्चति यदा द्विजः
ब्रूणहास तु विज्ञेयो वियोनिमधिगच्छति
नातिक्रामेद्यथाशक्तिमध्यापनमवश्यकम्
अशुज्ञोषोर्नदद्याद्वै (continues page 149)
End of page 147

149

द्वै नरको नात्र संशयः ।
वेदस्य पाठमात्रेण विगतं दुष्कृतो भवेत्
कुलमग्नौ यथा क्षिप्तं पापराशि प्रणश्यति
पदक्रमविशेषचार्यसंसदम्
पदमत्र विशेषज्ञो वर्णक्रमविचक्षणः
स्वरमात्रा विभागज्ञो गच्छेदाचार्यसंसदम्
नित्यस्वाद्ध्यायशीलत्वं दया सत्यञ्च संगमः
तेन शुद्धिमवाप्नोति देवत्वमधिगच्छति
छन्दपादौ तु वेदस्य हस्तौ कल्पोथ पठ्यते
ज्योतिषामयनं चक्षुर्निरुक्तं श्रोत्रमुच्यते

शीक्षा व्याघ्रं तु वेदस्या मुखं व्याकरणं स्मृतम्
शिक्षाकल्पो व्याकरणं निरुक्तं ज्योतिषं तथा
छन्दसां लक्षणं चेति षडंगानि विदुर्भुधः
अनुपदं चानुपपदं स्वच्छंदो भाषासमन्वितम्
मिमांसान्यायतर्काश्च उपांगानि विदुर्भुधाः
इत्यंगप्रकरणम्
स्वरास्तु ब्राह्मणाज्ञेयाः ओष्टयोस्वरयोर्मध्ये
आद्यंतयोस्तु वर्गश्चेत् पदादौ च पदादौ च
नकारांतं पदं पूर्वं  मात्रद्विमात्रानुस्वारः
ह्रस्वात्परोऽनुनासिक्यं ऋग्विरामस्त्रिमात्रं स्यात्
एकश्रुतिक्वचिद्विद्यात् वर्णान्यत्वं स्वरान्यत्वं
लवर्गे प्रथमागमः स्वरात्परस्य चर्णस्य अपूर्वो वा
द्वितीयस्तु अनुदात्तो हृदिज्ञेयः
द्विरुक्तं व्यंजनं यत्स्यात् अनंत्यं च भवेत्पूर्वम्
क्रमोद्वा भ्यां मनुक्रम्य य इच्छति जतां वक्तुम्
नादस्तु श्रुयते योश्योः मध्ये तु ब्रुपयेत्कंपम्
आत्माबुध्या समेत्यालृथान् गुरुत्वलघुता साम्यं

नावेदविदुषो विदुः

तस्मात्सांगमधीत्यैवा ब्रह्मलोके महीयते

इति शीक्षासमुच्चयं समाप्तम्

End of page 149

इति शीक्षासमुच्चय समाप्तः